?.04.14

## षष्ठी विभक्ति-3

अर्धं नपुंसकम् । समांशवाच्यर्धशब्दो क्लीबे, स प्राग्वत् । एकविभक्तावषष्ठ्यन्त वचनम् । (वा) एकदेशि समास विषयकोऽप्युपसर्जन सँज्ञा निषेधः । तेन 'पञ्चखट्वी' इत्यादि सिध्यति । अर्धं पिप्पल्याः अर्धपिप्पली । 'क्लीबे' किम् - ग्रामार्धः । द्रव्यैकत्व एव । अर्धं पिप्पलीनाम् ।

नपुंसक लिङ्ग 'अर्ध' प्रातिपदिक के सुबन्त का एकत्वबोधक अवयवीवाचक सुबन्त के साथ समास होता है और उस समास को 'तत्पुरुष' कहते हैं। यह भी पूर्ववत् षष्ठी का बाधक है। उदाहरण के लिए । अर्धं पिप्पल्याः (पीपल का आधा भाग) - इस विग्रह में नपुंसक सुबन्त (अर्धम्) का अवयवीवाचक सुबन्त (पिप्पल्याः) के साथ समास होकर (अर्धपिप्पली) रूप बनता है। एकवचनान्त कहने से यहाँ बहुतबोधक 'अर्धं पिप्पलीनाम्' आदि में समास नहीं होता।

द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् । एतान्येकदेशिना सह प्राग्वद्वा । द्वितीयं भिक्षाया: द्वितीयभिक्षा । 'एकदेशिना' किम् - द्वितीयं

(~~द्वितीय तृतीय चतुर्थ~~)

भिक्षाया भिक्षुकस्य । अन्तरस्माद् ग्रहण
सामर्थ्यात् । पूरणगुण — इति निषेधं
बाधित्वा पक्षे षष्ठी समासः । भिक्षाद्वितीयम् ।
प्राप्तापन्ने च द्वितीयया । पक्षे
। द्वितीयाश्रित — इति समासः । प्राप्तो जीविकां
प्राप्तजीविकः । जीविकां प्राप्तः । आपन्नजीविकः
जीविकापन्नः । इह सूत्रे । द्वितीयया अ' इति
छित्वा ~~अकारोऽपि~~ अकारोऽपि विधीयते ।
तेन जीविकां प्राप्ता स्त्री प्राप्तजीविका । आपन्न
जीविका ।

कालाः परिमाणिना । परिच्छेद्य
वाचिना सुबन्तेन सह कालाः समस्यन्ते ।
मासो जातस्य मासजातः । द्व्यहजातः । द्वयोरह्नोः
समाहारो द्व्यहः । द्व्यहो जातस्य इति विग्रहे
। उभयपदेन परिमाणिना द्विगोः सिद्धये बहूनां
तत्पुरुषस्योपसंख्यानम् ' द्वे अहनी जातस्य
द्व्यहजातः । अह्नोऽह्न इति वचनमणोऽ
ह्वादेशः । पूर्वत्र तु ' न संख्यादेः
समाहारे ' इति निषेधः ।